दिनाङ्क :- 08.05.2025

प्रात: - 06:55

## सिन्दूराभियानम्

पहलगाम्-नगरे भयोत्पादकस्य आतङ्क्याक्रमणस्य सप्ताहद्वयानन्तरं, भारतीय-सशस्त्र-सेना पाकिस्तानाधिकृतस्य जम्मू-कश्मीरस्य च नव-आतङ्ककेन्द्राणां विरुद्धं गतरात्रौ प्रक्षेपास्त्रप्रहारं अकरोत्। प्रातः पञ्चाधिक-एकवादनतः समारभ्य सार्धैकवादनपर्यन्तं 'आपरेशन्-सिन्दूर्' इत्यस्य अन्तर्गतं सैन्य-कार्याचरणम् एतत् विहितम् । भारतीय-सशस्त्र-सेना पाकिस्तान-देशे, पाकिस्तानाधिकृत-जम्मू-कश्मीर-प्रदेशे आतङ्किकसंरचनायाः उपरि आक्रमणं अकरोत् , यत्र ते भारतस्य विरुद्धं आतङ्क्याक्रमणानां योजनाम् अकुर्वन्, निर्देशं च प्रायच्छन्। आपरेशन्-सिन्दूर् इत्यस्य विषये प्रसारमाध्यमान् संसूचयन् विदेश-सचिवः विक्रम-मिसरी इत्येषः अवदत् यत् पहलगाम्-नगरे आतङ्क्याक्रमणस्य अन्वेषणेन आतङ्किभिः सह पाकिस्तानस्य सम्बन्धाः उद्घाटिताः सन्ति ।

अभियानस्य विवरणं दत्त्वा भारतीयसेनायाः कर्नल्-सोफिया-कुरैशी इत्येषा अवदत् यत् अनेन अभियानेन नव आतङ्कि-केन्द्राणि पूर्णतया नष्टानि अभवन् । सा पाकिस्तानदेशे नष्टानां आतङ्किकशिबिराणां विषये अपि विवरणं दत्तवती।

भारतीय-वायुसेनायाः सेनानायिका व्योमिका-सिहः संसूचितवती यत् आपरेशन् सिन्दूर् इति पहलगाम्-नगरे आतङ्कि-आक्रमणस्य पीडितानां न्यायार्थं प्रारब्धम् ।

## राजनाथसिंहः-सिन्दूराभियानम्

रक्षामन्त्री राजनाथसिंहः ह्यः प्रोक्तवान् यत् भारतीयसेनया सिन्दूराभियानस्य अन्तर्गतं स्वीयसाहसिकप्रदर्शनेन इतिहासः विरचितः।

सः अवदत् यत् सशस्त्रसेना अभियानस्य समये यथार्थतया, जागरूकतया, संवेदनशीलतया च कार्यम् अकरोत् , नियोजित-कार्यनीत्यानुसारं स्थापितं लक्ष्यं च नष्टीकृतवान्। नवदिल्ल्यां षट् राज्याणां, द्वयोः केन्द्रशासित-प्रदेशयोः च सीमा-मार्ग-सङ्घटनस्य पञ्चाशत्-मूलसंरचना-परियोजनानां उद्घाटनावसरे सम्बोधयन् सिंह-वर्यः एतत् वक्तव्यम् अयच्छत् ।

एनएसए ऑपरेशन सिन्दूर :

ऑपरेशन सिन्दूरेत्यस्य अंतर्गतं पाकिस्ताने पाकिस्तानेन अधिगृहिते जम्मू-कश्मीरस्य च नवस्थानेषु आततायिसु आतङ्कवादीनां आधारभूतसंरचनासु च उपरि केन्द्रितप्रहारस्य अनन्तरमेव राष्ट्रियसुरक्षापरामर्शदः अजीत डोवालः विभिन्नदेशानां सुरक्षापरामर्शदैः सह वार्तालापं कृतवान्। केन्द्रीय विदेश मन्त्रिणा एस.जयशङकरेण विभिन्नेभ्य: देशेभ्य: प्रति प्रशंसा विहिता ये भारतं प्रति समर्थनं प्रदर्शिवन्त:।

अमितशाह उपवेशनम्

केन्द्रीय गृहमंत्री अमितशाह: ह्य: नवदिल्ल्यां उपराज्यपालै:, मुख्यमंत्रीभि:, आरक्षण महानिदेशकै:, समीपस्थ देश: अपि च राज्यानां मुख्य सचिवै: च सह ऑपरेशन् सिन्दुर इत्यस्य अनन्तरं समीक्षा-सभाया: अध्यक्षताम् अकरोत।

सर्वदलीयम् उपवेशनम्

ऑपरेशन् सिन्दुर इति अभिलक्ष्य सर्वकारेण अद्य नवदिल्लयां सर्वदलीयोपवेशनमाहूतम्। उपवेशनावधौ सर्वकार: सिन्दुर अभियानस्य विवरणं प्रदास्यति।सर्वेऽपि दलस्य नेतार: अभियानस्यास्य प्रशंसां अकुर्वन। विपक्षीय दलेनापि समर्थनं विहितम्।

आईपीएल क्रिकेट

अपि च क्रीडा वार्तासु आई.पी.एल टी-20 क्रिकेट प्रतिस्पर्धायां, गत रात्रौ इडेन गॉर्डनेंस क्रीडांगणे चेन्नई सुपर किंग्स दलेन कोलकाता नाइट राइडर्स दलं द्विस्तोभै: पराजितम्।

मॉक ड्रिल-दिल्ली

ह्य: अशेषे हि देशे नागरिक सुरक्षाभ्यास: (मॉक ड्रिल) इति संजात:। नवदिल्लया: एकादश जनपदेषु मॉकड्रिल इत्यस्य अभ्यास समजायत। अस्मिन् छात्रा: एनसीसी, एन.एस.एस, एन वाई के एस, स्वयंसेविका: सक्रियतया भागं अगृह्णन। अभ्यासोऽयं प्रमुख स्थानेषु यथा-राष्ट्रपतिभवनं, नॉर्थ ब्लॉक, साउथ ब्लॉक, बंगाली मार्केट, खान मार्केट, एन डी एम सी पालिका केन्द्र, आई जी आई विमान स्थानकं, दिल्ली केन्ट इत्यत्र च अभवत्।